## ४ – क्र्यादिगणः

क्र्यादिगणे ६१ धातवः सन्ति। अस्य गणस्य तिङन्तरूपाणि अपि जनेभ्यः भ्रमात्मकानि। परन्तु यथा स्वादिगणे तनादिगणे च, अत्रापि रूपसिद्धिः दुष्करा न अपितु अत्यन्तं तर्कपूर्णा। सा च रूपसिद्धिः ज्ञायते चेत्, अयं गणः नैव कष्टकरः।

**क्र्यादिभ्यः श्ना** (३.१.८१) इति सूत्रेण श्ना इति विकरणप्रत्ययः विहितः। **लशक्वतद्धिते** (१.३.८) इत्यनेन शकारस्य इत्–संज्ञा, **तस्य लोपः** (१.३.९) इत्यनेन लोपः। ना इति अवशिष्यते।

**क्र्यादिभ्यः श्ना** (३.१.८१) = क्र्यादिगणे स्थितेभ्यः धातुभ्यः श्ना–प्रत्ययः भवति, कर्त्रर्थक–सार्वधातुकप्रत्यये परे। **कर्तरि शप्** (३.१.६८) इत्यस्य अपवादः। क्रीः आदिर्येषां ते, क्र्यादयः बहुव्रीहिः, तेभ्यः क्र्यादिभ्यः। क्र्यादिभ्यः पञ्चम्यन्तं, श्ना प्रथमान्तं, द्विपदमिदं सूत्रम्। **कर्तरि शप्** (३.१.६८) इत्यस्मात् **कर्तरि** इत्यस्य अनुवृत्तिः; **सार्वधातुके यक्** (३.१.६७) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः। **प्रत्ययः** (३.१.१), **परश्च** (३.१.२) इत्यनयोः अधिकारः; **धातोरनेकाचो हलादेः क्रियासमभिहारे यङ्** (३.१.२२) इत्यस्मात् **धातोः** इत्यस्य अधिकारः। अनुवृत्ति–सहितसूत्रम्— **क्र्यादिभ्यः धातुभ्यः श्ना प्रत्ययः परश्च कर्तरि सार्वधातुके**।

श्ना शित् अतः **तिङ्शित्सार्वधातुकम्** (३.४.११३) इत्यनेन सार्वधातुकप्रत्ययः। अतः **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणकार्यस्य प्रसक्तिः अस्ति, यथा क्री + ना इति स्थितौ। **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणकार्यस्य प्रसक्तिः अस्ति, यथा विष् + ना इति स्थितौ। परन्तु श्ना अपित् अतः **सार्वधातुकमपित्** (१.२.४) इति सूत्रेण ङिद्वत्; तदर्थं **क्क्ङिति च** (१.१.५) इत्यनेन उभयत्र गुण–निषेधः।

यथा पूर्वतनेषु गणेषु, अत्रापि सार्वधातुकलकारेषु तिङन्तानां निर्माणार्थं त्रीणि सोपानानि सन्ति—

१. विकरणप्रत्यय–निमित्तकम् अङ्गकार्यं, तदा धातु–विकरणप्रत्यययोः मेलनम्
२. तिङ्प्रत्यय–सिद्धिः
३. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–तिङ्प्रत्यययोः मेलनम्

### १. विकरणप्रत्यय–निमित्तकम् अङ्गकार्यं, तदा धातु–विकरणप्रत्यययोः मेलनम्

अपित्त्वात् गुणनिषेधः इत्यनेन कारणेन प्रथमसोपाने सामान्यधातुषु किमपि कार्यं नास्ति।

अजन्तधातवः—
इकारान्तधातवः सि + ना → सिना
उकारान्तधातवः यु + ना → युना
ऋकारान्तधातवः वृ + ना → वृणा

हलन्तधातवः—
इदुपधधातवः क्लिश् + ना → क्लिश्ना
उदुपधधातवः गुध् + ना → गुध्ना

ऋदुपधधातवः  मृद् + ना → मृद्ना
शेषधातवः  खच् + ना → खच्ञा
अश् + ना → अश्ना

परन्तु क्र्यादिगणे विशेषधातवः अपि सन्ति, येषां प्रथमसोपाने अङ्गकार्यं भवति |

a. <u>प्वादिगणः</u>

प्वादिगणे चतुर्विंशतिः धातवः सन्ति; एषां निरनुबन्धरूपाणि इमानि— पू, लू, धू, ज्या, री, ली व्ली, प्ली, स्तॄ, कॄ, वॄ, शॄ, पॄ, वॄ, भॄ, मॄ, दॄ, जॄ, झॄ, धॄ, नॄ, कॄ, ॠ, गॄ | एते सर्वे धातवः क्र्यादिगणे सन्ति | **प्वादीनां ह्रस्वः** (७.३.८०) इति सूत्रेण धातौ स्थितस्य स्वरस्य ह्रस्वत्वं भवति शिति परे | श्ना शित् अस्ति अतः श्ना-प्रत्यये परे धातुस्थ-स्वरस्य ह्रस्वत्वम् | यथा पू + ना → पुना, ली + ना → लिना, स्तॄ + ना → स्तृणा |

**प्वादीनां ह्रस्वः** (७.३.८०) = पूञ्, लूञ्, धूञ्, ज्या, री, ली व्ली, प्ली, स्तॄञ्, कॄञ्, वॄ, शॄ, पॄ, वॄञ्, भॄ, मॄ, दॄ, जॄ, झॄ, धॄञ्, नॄ, कॄ, ॠ, गॄ, एषां धातूनां ह्रस्वत्वं भवति शिति प्रत्यये परे | पूः आदिर्येषां ते, प्वादयः बहुव्रीहिः, तेषां प्वादीनाम् | **येन विधिस्तदन्तस्य** (१.१.७२), **अलोऽन्त्यस्य** (१.१.५२), **अचश्च** (१.२.२८) इत्येभिः सूत्रैः एषां धातूनाम् अन्तिमस्वरस्य ह्रस्वादेशो भवति | प्वादीनां षष्ठ्यन्तं, ह्रस्वः प्रथमान्तं, द्विपदमिदं सूत्रम् | **ष्ठिवुक्लमुचमां शिति** (७.३.३५) इत्यस्मात् **शिति** इत्यस्य अनुवृतिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **प्वादीनाम् अचः अङ्गस्य ह्रस्वः शिति |**

**अचश्च** (१.२.२८) = यत्र यत्र ह्रस्वः, दीर्घः, प्लुतः च विधीयन्ते, तत्र तत्र **अचः** इति षष्ठ्यन्तं पदम् आगत्य उपस्थितं भवति | परिभाषासूत्रम् | अचः षष्ठ्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **ऊकालोऽज्झ्रस्वदीर्घप्लुतः** (१.२.२७) इत्यस्मात् **अच्, ह्रस्वदीर्घप्लुतः** इत्यनयोः अनुवृत्तिः | तत्र विभक्तिपरिणामेन तृतीयान्तं भवति, **ह्रस्वदीर्घप्लुतैः (शब्दैः)** | अनुवृत्ति-सहितसूत्रम्— **ह्रस्वदीर्घप्लुतैः अचः च अच् |**

**अलोऽन्त्यस्य** (१.१.५२) = षष्ठीविभक्ति-द्वारा यस्य पदस्य स्थाने आदेशः प्राप्तः, सः आदेशः अन्त्यस्य अल्-वर्णस्य स्थाने भवति | परिभाषासूत्रम् | अलः षष्ठ्यन्तम्, अन्त्यस्य षष्ठ्यन्तम्, द्विपदमिदं सूत्रम् | **षष्ठी स्थानेयोगा** (१.१.४९) इत्यस्मात् **षष्ठी, स्थाने** इत्यनयोः अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **षष्ठ्या अन्त्यस्य अलः स्थाने** (विद्यमानः आदेशः) |

अत्र धेयं यत् यः प्रत्ययः परोऽस्ति सः शित् नास्ति चेत्, स्वरस्य ह्रस्वत्वं न भवति | अतः कर्मणि **सार्वधातुके यक्** (३.१.६७) इत्यनेन यक् कृत्वा लटि पूयते, क्तान्ते क्त-प्रत्ययेन पूनः, क्तवतौ क्तवतु- प्रत्ययेन पूनवान् |

b. <u>सम्प्रसारणम्— ज्या-धातुः</u>

ज्या-धातुः प्वादिगणे अन्तर्भूतः, किन्तु सम्प्रसारणी धातुः अपि अस्ति, अतः अत्र विशेषः |

सम्प्रसारणम्—
**ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति च** (६.१.१६) = ग्रह्, **ज्या**, वय्, व्यध्, वश्, व्यच्, व्रश्च्, प्रच्छ्,

भ्रस्ज्, एषां सम्प्रसारणं भवति किति ङिति प्रत्यये परे |

**इग्यणः सम्प्रसारणम्** (१.१.४५) = यणः स्थाने यः इक्–प्रत्याहारे स्थितवर्णः आदिष्टः, तस्य सम्प्रसारण–संज्ञा भवति | इक् प्रथमान्तं, यणः षष्ठ्यन्तं, सम्प्रसारणम् प्रथमान्तं, त्रिपदमिदं सूत्रम् | सूत्रं सम्पूर्णम्— **यणः इक् सम्प्रसारणम्** |

**सम्प्रसारणाच्च** (६.१.१०८) = सम्प्रसारण–संज्ञक–वर्णात् अचि परे पूर्वपरयोः स्थाने एकः पूर्वरूपादेशो भवति | सम्प्रसारणात् पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **इको यणचि** (६.१.७७) इत्यस्मात् **अचि**, **अमि पूर्वः** (६.१.१०७) इत्यस्मात् **पूर्वः** इत्यनयोः अनुवृत्तिः भवतः | **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति–सहितसूत्रम्— **सम्प्रसारणात् च अचि पूर्वपरयोः एकः पूर्वः संहितायाम्** |

यथा ज्या → ज् + य् + आ → **ग्रहि ज्या (६.१.१६)** इत्यनेन यकारस्य स्थाने इ–आदेशः → जि + आ → **सम्प्रसारणाच्च** (६.१.१०८) इत्यनेन सम्प्रसारण–संज्ञक–वर्णात् अचि परे पूर्वपरयोः एकः पूर्वरूपादेशः → जि

श्ना प्रत्ययः शित् अपि च पित्–भिन्नत्वात् ङिद्वत् (**सार्वधातुकम् अपित्** इत्यनेन) | **ग्रहि ज्या (६.१.१६)** इत्यनेन "ज्या ... ङिति" सम्प्रसारणम् | अतः ज्या + ना → सम्प्रसारणम् → जि + ना → **हलः** (६.४.२) इत्यनेन सम्प्रसारणस्य दीर्घत्वम् → जी + ना → **प्वादीनां ह्रस्वः** (७.३.८०) इत्यनेन शिति परे प्वादीनां ह्रस्वत्वम् → जि + ना → जिना

**हलः** (६.४.२) = अङ्गावयवात् हलः यदुत्तरं संप्रसारणं तदन्तस्याङ्गस्य दीर्घो भवति | यः हल्–वर्णः अङ्गस्य अवयवः, तस्मात् परे स्थितं यत् अङ्गान्तं सम्प्रसारणं, तस्य दीर्घत्वं भवति | हलः पञ्चम्यन्तम् एकपदमिदं सूत्रम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृशम् अङ्गं यस्य अन्ते सम्प्रसारणसंज्ञकवर्णः अस्ति; **अचश्च** (१.२.२८), **अलोऽन्त्यस्य** (१.१.५२) इत्याभ्यां तस्य अङ्गस्य अन्तिमवर्णस्य अचः दीर्घादेशः | **सम्प्रसारणस्य** (६.३.१३९) इत्यस्मात् **सम्प्रसारणस्य** इत्यस्य अनुवृत्तिः | **ढ्रलोपे पूर्वस्य दीर्घोऽणः** (६.३.१११) इत्यस्मात् **दीर्घः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **हलः सम्प्रसारणस्य अङ्गस्य दीर्घः** |

अत्र यः इकारः दीर्घः जातः (जि → जी), सः पुनः ह्रस्वः अभवत् (जी → जि) | तर्हि दीर्घत्वस्य फलं किम् ? यत्र परो यः प्रत्ययः अस्ति सः शित् नास्ति, तत्र **प्वादीनां ह्रस्वः** इत्यस्य प्रसक्तिः नास्ति | अतः दीर्घत्वं तिष्ठति एव—यथा क्त प्रत्ययः | ज्या + क्त → **ग्रहि ज्या (६.१.१६)** इत्यनेन "ज्या ... ङिति" सम्प्रसारणम् → जि + त → **हलः** (६.४.२) इत्यनेन सम्प्रसारणस्य दीर्घत्वम् → जी + त → (**ल्वादिभ्यः** (८.२.४४) इत्यनेन तकारस्य स्थाने नकारः) → जीनः |

**ल्वादिभ्यः** (८.२.४४) = ल्वादिगणः इत्यस्मिन् अन्तर्गणीयेभ्यः धातुभ्यः निष्ठा–प्रत्यये परे निष्ठाघटितस्य तकारस्य नकारादेशो भवति | निष्ठा–संज्ञकप्रत्ययद्वयं भवति— क्त–प्रत्ययः, क्तवतु–प्रत्ययः च | ल्वादिगणे एकविंशतिः धातवः सन्ति | यथा लूञ् छेदने | लू + क्त → लू + त → लू + न → लूनः | कर्तितः इर्यर्थः | क्तवतौ लूनवान् |

अन्यत् उदाहरणं भवति भ्वादौ ह्वेञ्–धातुः | लटि ह्वे + शप् → ह्वय + ति → ह्वयति | आ–उपसर्गपूर्वकः ह्वे लटि च आह्वयति | क्तप्रत्यये परे—

ह्वे + क्त → **वचिस्वपियजादीनां किति** (६.१.१५) इत्यनेन सम्प्रसारणम् → हु + ए + त → **सम्प्रसारणाच्च** (६.१.१०८) इत्यनेन सम्प्रसारण–संज्ञक–वर्णात् अचि परे पूर्वपरयोः स्थाने एकः पूर्वरूपादेशः → हु + त → **हलः** (६.४.२) इत्यनेन अङ्गावयवात् हलः यदुत्तरं

संप्रसारणं तदन्तस्याङ्गस्य दीर्घत्वम् → हूत | आ–उपसर्गपूर्वकरूपम् आहूत | क्तवतौ पुंसि आहूतवान् |

**वचिस्वपियजादीनां किति** (६.१.१५) = वच्, स्वप्, यज्, वप्, वह्, वस्, वद्, वेञ्, ह्वेञ्, श्वि, व्येञ् इत्येषां धातूनां सम्प्रसारणं भवति किति प्रत्यये परे | यज् आदिर्येषां ते यजादयः | वचिश्च स्वपिश्च यजादयश्च तेषामितरेतरद्वन्द्वो वचिस्वपियजादयः, तेषां वचिस्वपियजादीनाम् | वचिस्वपियजादीनां षष्ठ्यन्तं, किति सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **ष्यङः सम्प्रसारणम् पुत्रपत्योस्तत्पुरुषे** (६.१.१३) इत्यस्मात् **सम्प्रसारणम्** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **वचिस्वपियजादीनां सम्प्रसारणं किति** |

**हलः** (६.४.२) इति सूत्रे 'हलः यदुत्तरं संप्रसारणम्' इति किमर्थम् उक्तम् ? हल्–वर्णः किमर्थं पूर्वं भवेत् ? भ्वादौ वे इत्यस्य वे + क्त → उतः एव | पूर्वस्थितस्य हल्वर्णस्य अभावात् न दीर्घत्वम् | क्तवतौ उतवान् | 'अङ्गावयवात् हलः' इत्यनेन अयं हल्–वर्णः किमर्थं अङ्गस्य अवयवः भवेत् ? निर् + वे + क्त → निरुतम् | रेफः यद्यपि हल्–वर्णः, किन्तु अङ्गस्य अवयवः न, अतः दीर्घादिशो न भवति | 'तदन्तस्याङ्गस्य' दीर्घत्वं किमर्थम् ? व्यध् इत्यस्य विद्धः, व्यच् इत्यस्य विचितः |

c. <u>सम्प्रसारणम्— ग्रह्–धातुः</u>

**ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति च** (३.१.१३) = **ग्रह्**, ज्या, वय्, व्यध्, वश्, व्यच्, व्रश्च्, प्रच्छ्, भ्रस्ज्, एषां सम्प्रसारणं भवति किति ङिति प्रत्यये परे |

ग्रह् + श्ना = ग् + र् + अ + ह्  + श्ना → **ग्रहि ज्या (६.१.१६)** इत्यनेन सम्प्रसारणम् (र् → ऋ, अकारस्य पूर्वरूपादेशः) → ग् + ऋ + ह् + ना → **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इत्यनेन णत्वम् → गृह्णा इति अङ्गम् |

d. <u>ज्ञा–धातुः</u>

**ज्ञाजनोर्जा** (७.३.७९) = ज्ञा (क्र्यादिगणे), जन् (दिवादिगणे) चेत्यनयोः जा–आदेशो भवति शिति प्रत्यये परे | आदेशः अनेकाल् अतः **अनेकाल्शित् सर्वस्य** (१.१.५५) इत्यनेन आदेशः सर्वस्थानिनः स्थाने भवति (न तु अन्त्यवर्णस्य) | ज्ञाश्च जन् च तयोरितरेतरद्वन्द्वः ज्ञाजनौ, तयोः ज्ञाजनोः | ज्ञाजनोः षष्ठ्यन्तं, जा लुप्तप्रथमाकं पदं, द्विपदमिदं सूत्रम् | **ष्ठिवुक्लमुचमां शिति** (७.३.७५) इत्यस्मात् **शिति** इत्यस्य अनुवृतिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ज्ञाजनोः अङ्गस्य जा शिति** |

**अनेकाल्शित् सर्वस्य** (१.१.५५) = आदेशः अनेकाल् (आदेशे एक एव वर्णः न अपि तु अनेके वर्णाः) अथवा शित् चेत्, सर्वस्थानिनः स्थाने भवति (न तु अन्त्यवर्णस्य) | (यस्य स्थाने आदेशः आदिष्टः, सः स्थानी |) इदं सूत्रम् **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः | न एकः अनेकः नञ्तत्पुरुषः; अनेकः अल् यस्य सः अनेकाल् बहुब्रीहिः; शकारः इत् यस्य सः शित् बहुब्रीहिः; अनेकाल् च शित् च अनेकाल्शित् समाहारद्वन्द्वः | अनेकाल् प्रथमान्तं, शित् प्रथमान्तं, सर्वस्य षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **अनेकाल्शित् सर्वस्य स्थाने** |

ज्ञा + ना → **ज्ञाजनोर्जा** इत्यनेन धात्वादेशः → जा + ना → जाना इत्यङ्गम् |

दिवादिगणे जन् + श्यन् → जा + य → जाय इत्यङ्गम् |

अशिति जा–आदेशः न भवति | ज्ञा + स्यति → ज्ञास्यति | ज्ञा + क्त → ज्ञातः | जन् + स्यते → जनिष्यते | जन् + क्त → **जनसनखनां सञ्झलोः** (६.४.४२) इत्यनेन नकारस्य आकारः, सवर्णदीर्घः → जातः |

**जनसनखनां सञ्झलोः** (६.४.४२) = जन्, सन्, खन् एषां धातूनां नकारस्य स्थाने आकारादेशो भवति झलादि–सन्–प्रत्यये परे झलादि–कित्ङित्–प्रत्यये परे च | अनुवृत्ति–सहितसूत्रम्— **जनसनखनाम् अङ्गानाम् आत् झलि सञ्झलोः क्ङिति** |

e. <u>अनिदितः धातवः</u>

एतावता अस्माभिः दृष्टं यत् धातुः इदित् अस्ति चेत्, तत्र नुमागमस्य प्रसक्तिः | यथा वदि–धातुः इदित् (ह्रस्व–इकारः इत् यस्य सः) अस्ति अतः **इदितो नुम् धातोः** (७.१.५८) इति सूत्रेण नुमागमः विहितः | वदि → वद् → वन्द् → वंद् → वन्द् इति भवति | स च नुमागमः नित्यः; न कदापि गच्छति | नाम यदा मूलधातौ नकारः नास्ति (यथा वद् धातौ), अनन्तरं नकारं योजयामः (**इदितो नुम् धातोः** इति सूत्रेण), तदा तस्य नकारस्य लोपः न कदापि भवति |

परन्तु मूलधातौ नकारः अस्ति चेत्, तर्हि तस्य लोपः अर्हः | क्र्यादौ एतादृशाः षट् धातवः सन्ति—बन्ध्, श्रन्थ्, मन्थ्, श्रन्थ् (अन्यः), ग्रन्थ्, कुन्थ् च | एते धातवः अनिदितः (ह्रस्व–इकारः इत् येषां नास्ति ते), अतः किति ङिति प्रत्यये परे तेषाम् उपधायां स्थितस्य नकारस्य लोपः भवति | श्ना अपित् अतः **सार्वधातुकम् अपित्** इति सूत्रेण् ङिद्वत् भवति |

**अनिदितां हल उपधाया क्ङिति** (६.४.२४) = येषां हलन्त–धातूनां ह्रस्व–इकारस्य इत्–संज्ञा नास्ति, तेषाम् उपधायां नकारः अस्ति चेत्, तस्य नकारस्य लोपः भवति किति ङिति प्रत्यये परे | इत् इत् अस्ति येषाम् ते इदितः, न इदितः, अनिदितः, बहुव्रीहिगर्भः नञ्तत्पुरुषसमासः, तेषाम् अनिदिताम् | क् च ङ् च तयोः इतरेतरद्वन्द्वः क्ङौ | क्ङौ इतौ यस्य सः क्ङित्, द्वन्द्वगर्भः बहुव्रीहिसमासः, तस्मिन् क्ङिति | अनिदितां षष्ठ्यन्तं, हलः षष्ठ्यन्तम्, उपधाया षष्ठ्यन्तं, क्ङिति सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **श्नान्नलोपः** (६.४.२३) इत्यस्मात् **न**, **लोपः** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहित–सूत्रम्— **अनिदितां हलः अङ्गस्य उपधायाः नः लोपः क्ङिति** |

यथा—

बन्ध + श्ना → बन्ध् + ना → उपधा–नकारस्य लोपः ङिति परे (**अनिदितां हल उपधाया क्ङिति**) → बध् + ना → बध्ना इत्यङ्गम्
श्रन्थ + श्ना → श्रन्थ् + ना → उपधा–नकारस्य लोपः ङिति परे (**अनिदितां हल उपधाया क्ङिति**) → श्रथ् + ना → श्रथ्ना इत्यङ्गम्
मन्थ + श्ना → मन्थ् + ना → उपधा–नकारस्य लोपः ङिति परे (**अनिदितां हल उपधाया क्ङिति**) → मथ् + ना → मथ्ना इत्यङ्गम्

क्र्यादिगणे सार्वधातुकलकारेषु सर्वत्र श्ना आयाति | श्ना अपित् अतः ङिद्वत्; तर्हि सार्वधातुकलकारेषु (लट्, लोट्, लङ्, विधिलिङ् इत्येषु) सर्वत्र न–लोपः | यथा लटि बन्ध् + श्ना + ति → बध्नाति | शतृ अपि तथा यतः शतृ शित् अतः सार्वधातुकप्रत्ययः; शतृ सर्वदा कर्त्रर्थे अतः **कर्तरि शप्** इत्यनेन शप्, शपं प्रबाध्य श्ना | बन्ध + श्ना + शतृ → बन्ध् + श्ना + अत् → बध्ना + अत् → अजादिषु अपित्सु श्ना–प्रत्ययस्य आकार–लोपः (**श्नाभ्यस्तयोरातः** इति सूत्रेण, अधः तृतीये सोपाने पश्यन्तु) → बध्नत् | पुंसि बध्नन् |

आर्धधातुक–प्रत्ययेषु परेषु, कित्त्वात् नलोपः | दृष्टान्ते क्तप्रत्यये परे बन्ध् + क्त → **अनिदितां हल उपधाया क्ङिति** (६.४.२४) → बद्ध, पुंसि बद्धः | सम् + बन्ध् + क्त → सम्बद्ध, पुंसि सम्बद्धः |

आर्धधातुक–प्रत्ययेषु परेषु (कित्–ङित् इति प्रत्ययान् विहाय) अनिदितां न–लोपः न भवति | यथा बन्ध् + तव्यत् → बन्धव्यम्; बन्ध् + अनीयर् → बन्धनीयम्; बन्ध् + तुमुन् → बन्धुम् |

f. <u>णत्वम्</u>

क्र्यादिगणे बहुषु धातुषु रेफः, ऋकारः, षकारः च सन्ति अतः तेभ्यः वर्णेभ्यः नकारस्य णत्वं भवति | **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इत्यनेन स्वराः, कवर्गीय–व्यञ्जनानि, पवर्गीय–व्यञ्जनानि, ह–य–व–र, अनुस्वारः च मध्ये सन्ति चेदपि णत्वं भवति |

यथा क्री + ना → क्रीणा; गृह् + ना → गृह्णा | अत्र ऋकार–नकारयोः मध्ये हकारः अस्ति, तथापि नकारस्य णत्वं भवतीति |

## २. <u>तिङ्संज्ञकप्रत्यय–सिद्धिः</u>

अनदन्ताङ्गानां कृते तिङ्प्रत्यय–सिद्धिः जाता एव | यत्र अङ्गम् अनदन्तं, तत्र सर्वेषां धातूनां कृते सिद्ध–तिङ्संज्ञकप्रत्ययाः समानाः इति तु वयं जानीमः | अतः क्र्यादिगणेऽपि सिद्ध–तिङ्प्रत्ययाः एते एव—

| <u>परस्मैपदम्</u> | <u>आत्मनेपदम्</u> |
|---|---|
| | |

<u>लट्-लकारः</u>

| | |
|---|---|
| **ति**, तः, अन्ति | ते आते अते |
| **सि**, थः, थ | से आथे ध्वे |
| **मि**, वः, मः | ए वहे महे |

<u>लोट्-लकारः</u>

| | |
|---|---|
| **तु**, तात् ताम् अन्तु | ताम् आताम् अताम् |
| हि, तात्, तम् त | स्व आथाम् ध्वम् |
| **आनि आव आम** | **ऐ आवहै आमहै** |

<u>लङ्-लकारः</u>

| | |
|---|---|
| **त्** ताम् अन् | त आताम् अत |
| **स्** तम् त | थाः आथाम् ध्वम् |
| **अम्** व म | इ वहि महि |

<u>विधिलिङ्-लकारः</u>

| | |
|---|---|
| यात् याताम् युः | ईत ईयाताम् ईरन् |
| याः यातम् यात | ईथाः ईयाथाम् ईध्वम् |
| याम् याव याम | ईय ईवहि ईमहि |

## ३. <u>तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–तिङ्प्रत्यययोः मेलनम्</u>

क्र्यादिगणे यदा अङ्गं निष्पन्नं, तदा सर्वेषां धातूनां कृते कार्यं समानमेव | स्मरन्तु यत् स्वादिगणे तथा नासीत्; तत्र अजन्तधातूनाम् एकः समूहः, हलन्तधातूनाम् अपरः समूहः | तनादिगणेऽपि तादृशविभजनं जातम् | अत्र क्र्यादिगणे सर्वेषां धातूनाम् अङ्गानि समानानि | (केवलम् एकस्मिन् स्थले तादृशं समूहद्वयम् अपेक्षितं यथा स्वादिगणे प्राप्यते; तच्च लोट्–लकारस्य मध्यमपुरुषैकवचने एव | अस्य पाठस्य अन्ते पृथक्तया परिशीलयाम; तत् विहाय सर्वगणः एकैव समूहः |)

यथासामान्यं, यत्र अङ्गम् अनदन्तम्, अत्रापि क्र्यादिगणे सिद्ध–तिङ्प्रत्ययानां भागचतुष्टयम् अस्ति— हलादिपितः, अजादिपितः, हलाद्यपितः, अजाद्यपितः च | किञ्च एतत् भागचतुष्टयम् अवलम्ब्य क्र्यादिगणे कार्यम् किञ्चित् भिन्नं भवति—

हलादिषु पित्सु = किमपि कार्यं नास्ति, केवलं योजनम् | अङ्गस्य आकारान्तत्वे सति गुणकार्यं न सम्भवति | क्रीणा + ति → क्रीणाति
अजादिषु पित्सु = केवलं सन्धिकार्यम् | क्रीणा + आनि → क्रीणानि
हलादिषु अपित्सु = श्ना–प्रत्ययस्य आकार–स्थाने ई–कारादेशः (**ई हल्यघोः** इति सूत्रेण) | क्रीणा + तः → क्रीणीतः
अजादिषु अपित्सु = श्ना–प्रत्ययस्य आकार–लोपः (**श्नाभ्यस्तयोरातः** इति सूत्रेण) | क्रीणा + अन्ति → क्रीणन्ति

**श्नाभ्यस्तयोरातः** (६.४.११२) = श्ना–प्रत्ययस्य अभ्यस्तसंज्ञकधातोः च आकारस्य लोपः भवति, किति ङिति सार्वधातुकप्रत्यये परे | श्नाश्च अभ्यस्तश्च तयोरितरेतरद्वन्द्वः श्नाभ्यस्तौ, तयोः श्नाभ्यस्तयोः | श्नाभ्यस्तयोः षष्ठ्यन्तम्, आतः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **श्नसोरल्लोपः** (६.४.१११) इत्यस्मात् **लोपः**, इत्यस्य अनुवृत्तिः | **गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) इत्यस्मात् **क्ङिति** इत्यस्य अनुवृत्तिः | **अत उत्सार्वधातुके** (६.४.११०) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य श्नाभ्यस्तयोः आतः लोपः क्ङिति सार्वधातुके** |

अभ्यस्तसंज्ञकम् अङ्गं यथा जुहोत्यादिगणे मा–धातुः → मिमा इति अङ्गम् | मिमा + अते → मिम् + अते → मिमते |

अनेन सूत्रेण न केवलम् अजाद्यपिति अपि तु हलाद्यपिति अपि कार्यं विहितं, किन्तु हलादिषु अपित्सु **ई हल्यघोः** इति सूत्रम् एतत् कार्यं प्रबाध्य आकारस्य स्थाने ई–कारादेशं विदधाति |

**ई हल्यघोः** (६.४.११३) = श्ना–प्रत्ययस्य अभ्यस्तसंज्ञकधातोः च आकारस्य स्थाने ई–कारादेशः भवति, किति ङिति हलादिसार्वधातुकप्रत्यये परे—परन्तु घुसंज्ञक–धातुः चेत्, न भवति (घुसंज्ञक–धातुः नाम दा धा च धातू) | न घुः अघुः, तस्य अघोः | ई लुप्तप्रथमाकं पदं, हलि सप्तम्यन्तम्, अघोः षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | **श्नाभ्यस्तयोरातः** (६.४.११२) इत्यस्मात् **श्नाभ्यस्तयोः**, **आतः** चेत्यनयोः अनुवृत्तिः | **गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) इत्यस्मात् **क्ङिति** इत्यस्य अनुवृत्तिः; **अत उत्सार्वधातुके** (६.४.११०) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य श्नाभ्यस्तयोः आतः ई क्ङिति हलि सार्वधातुके अघोः** |

अभ्यस्तसंज्ञकम् अङ्गं यथा जुहोत्यादिगणे मा–धातुः → मिमा इति अङ्गम् | मिमा + ते → मिमीते |

A. <u>परस्मैपदे लट्</u>— (स्थूलाक्षरैः लिखिताः प्रत्ययाः पितः इति | अन्ये अपितः |)

**ति**, तः, अन्ति
**सि**, थः, थ
**मि**, वः, मः

<u>परस्मैपदे लटि क्री धातुः</u>

क्रीञ् + श्ना → क्री + ना → क्रीणा इत्यङ्गम् | अधः सर्वत्र क्रीणा इत्यङ्गम् अधिकृत्य कार्यम् अग्रे सरति |

क्रीणा + **ति** →
क्रीणा + तः →
क्रीणा + अन्ति →
क्रीणा + **सि** →
क्रीणा + थः →
क्रीणा + थ →
क्रीणा + **मि** →
क्रीणा + वः →
क्रीणा + मः →

B. <u>आत्मनेपदे लट्</u>—

ते आते अते
से आथे ध्वे
ए वहे महे

<u>आत्मनेपदे लटि क्री धातुः</u>

क्रीञ् + श्ना → क्री + ना → क्रीणा इत्यङ्गम् | अधः सर्वत्र क्रीणा इत्यङ्गं स्वीकृत्य कार्यम् अग्रे सरति |

क्रीणा + ते →
क्रीणा + आते →
क्रीणा + अते →
क्रीणा + से →
क्रीणा + आथे →
क्रीणा + ध्वे →
क्रीणा + ए →
क्रीणा + वहे →

क्रीणा + महे →

**आदेशप्रत्यययोः** (८.३.५९) = इण्–प्रत्याहारात् कवर्गीयात् च परे अपदान्तः आदेशरूपी प्रत्ययावयवो वा सकारः अस्ति चेत्, तर्हि तस्य सकारस्य स्थाने षकारादेशो भवति | अस्य कार्यस्य नाम षत्वविधिः | इण्–प्रत्याहरे इमे वर्णाः अन्तर्भूताः— इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ, ह, य, व, र, ल | आदेशः तु मूर्धन्यवर्णस्य इत्येव उक्तं, परं **स्थानेऽन्तरतमः** इत्यनेन ट्, ठ्, ड्, ढ्, ण्, ष् इत्येषु मूर्धन्यवर्णेषु षकारस्य नैकट्यम्, अतः षकारः एव आदिष्टः भवति | नुम्, विसर्गः, शर्–प्रत्याहारस्थ–वर्णः च मध्ये सन्ति चेत् अपि कार्यं भवति | आदेशश्च प्रत्ययश्च आदेशप्रत्ययौ, तयोः आदेशप्रत्यययोः इतरेतरद्वन्द्वः | षष्ठ्यन्तम् एकपदमिदं सूत्रम् | **सहे साडः सः** (८.३.५६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः | **नुंविसर्जनीयशर्व्यवायेऽपि** (८.३.५८) इत्यस्य पूर्णा अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | **इण्कोः** (८.३.५७), **अपदान्तस्य मूर्धन्यः** (८.३.५५) इत्यनयोः अधिकारः | अनुवृत्ति–सहितसूत्रम्— **इण्कोः आदेशप्रत्यययोः अपदान्तस्य सः मूर्धन्यः संहितायां, नुंविसर्जनीयशर्व्यवायेऽपि** |

C. <u>विशेषः — हि–प्रत्ययः</u>

अत्र, लोट्–लकारस्य मध्यमपुरुषैकवचने, धातूनां समूहद्वयं वर्तते, हलन्तधातवः अजन्तधातवः च | अजन्तधातवः सामान्याः, हलन्तधातवः अपवादभूताः च |

धातुः अजन्तः चेत्, सामान्यक्रमः | हि–प्रत्ययः हलाद्यपित् (**सेर्ह्यपिच्च** इति सूत्रेण) |

यथा—
क्रीणा + हि → हलादिषु अपित्सु श्ना–प्रत्ययस्य आकार–स्थाने ई–कारादेशः (**ई हल्यघोः** इति सूत्रेण) → क्रीणी + हि → क्रीणीहि |

तथैव ज्ञा → जानीहि, मी → मीनीहि, प्री → प्रीणीहि, द्रू → द्रूणीहि, वृ → वृणीहि |

परन्तु हौ परे हलन्तधातुपूर्वकः यः श्ना, तस्य स्थाने शानच्–आदेशः भवति; अनुबन्ध–लोपे आन इति आदेशः |

**हलः श्नः शानज्झौ** (३.१.८३) = हलुत्तरस्य श्ना–स्थाने शानच्–आदेशः भवति, हि–प्रत्यये परे | शानच् इत्यस्मिन् शकारलोपः **लशक्वतद्धिते** इति सूत्रेण, चकारलोपः **हलन्त्यम्** इति सूत्रेण, आन अवशिष्यते | **झलां जशोऽन्ते** (८.२.३९), **झयो होऽन्यतरस्याम्** (८.४.६२) [झयः उत्तरस्य हकारस्य पूर्वसवर्णादेशः] इत्याभ्यां शानच् + हौ → शानज्झौ | हलः पञ्चम्यन्तं, श्नः षष्ठ्यन्तं, शानच् प्रथमान्तम्, हौ सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **हलः श्नः शानच् हौ** |

धेयं यत् क्र्यादिगणे अङ्गम् अनदन्तम्, अतः हि–लोपः न भवति | परन्तु यदा श्ना–स्थाने शानच् आदेशः भवति, तदा अङ्गम् अदन्तं जातम् यतः शानच् (आन) अकारान्तः प्रत्ययः | अतः 'आन' इत्यस्य योजनेन हि–लोपः (लुक्) भवति |

ग्रह् + श्ना + हि → ङिति सम्प्रसारणम् → गृह् + ना + हि → गृह्णा + हि → श्ना–स्थाने शानच् (आन) → गृह् + आन + हि → णत्वम् → गृहाण + हि → अङ्गम् अदन्तम् अतः हि लोपः (**अतो हेः** इति सूत्रेण) → गृहाण

**अतो हेः** (६.४.१०५) = ह्रस्व–अकारात् अङ्गात् परस्य हि इत्यस्य लुक् (लोपः) भवति | अतः पञ्चम्यन्तं, हेः षष्ठ्यन्तं, द्विपदमिदं सूत्रम्

| **चिणो लुक्** (६.४.१०४) इत्यस्मात् **लुक्** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः (अत्र **अङ्गात्** भवति विभक्तिपरिणाम इति सिद्धान्तेन) | अनुवृत्ति-सहितसूत्रम्— **अतः अङ्गात् हेः लुक्** |

यथा मुष् + श्ना + हि → मुष्णा + हि → ना-स्थाने आन → मुष् + आन + हि → मुषाण
तथैव—
मृद्ना + हि → मृदान
बध्ना + हि → बधान
मथ्ना + हि → मथान
ग्रथ्ना + हि → ग्रथान
पुष्णा + हि → पुषाण
कुथ्ना + हि → कुथान

इति क्र्यादिगणस्य समग्रं चिन्तनम् | अधुना क्र्यादिगणीयेषु यः कोऽपि भवतु नाम, सार्वधातुकलकारेषु वयं सर्वाणि रूपाणि जानिमः |

<u>क्र्यादिगणे ६१ धातवः</u>

<u>अजन्तधातवः</u> [36 धातवः]

सामान्याः अजन्तधातवः [13 धातवः]

| औपदेशिकधातुः / अनुबन्धरहितधातुः / अङ्गम् / लट्लकाररूपम् | | | |
|---|---|---|---|
| षिञ् बन्धने | सि | सिना | सिनाति/सिनीते |
| व्री वरणे | व्री | व्रीणा | व्रीणाति |
| भ्री भये | भ्री | भ्रीणा | भ्रीणाति |
| क्षीष् हिंसायाम् | क्षी | क्षीणा | क्षीणाति |
| डुक्रीञ् द्रव्यविनिमये | क्री | क्रीणा | क्रीणाति |
| प्रीञ् तर्पणे | प्री | प्रीणा | प्रीणाति/प्रीणीते |
| श्रीञ् पाके | श्री | श्रीणा | श्रीणाति/श्रीणीते |
| मीञ् बन्धने | मी | मीना | मीनाति/मीनीते |
| स्कुञ् आप्रवणे | स्कु | स्कुना | स्कुनाति/स्कुनीति |
| युञ् बन्धने | यु | युना | युनाति/युनीते |
| क्नूञ् शब्दे | क्नू | क्नूना | क्नूनाति/क्नूनीते |
| द्रूञ् हिंसायाम् | द्रू | द्रूणा | द्रूणाति/द्रूणीते |
| वृङ् सम्भक्तौ | वृ | वृणा | वृणीते |

विशेषाः अजन्तधातवः [23 धातवः]

प्वादि–अन्तर्गणः [22 धातवः]

| | | | |
|---|---|---|---|
| पूञ् पवने | पू | पुना | पुनाति/पुनीते |
| लूञ् छेदने | लू | लुना | लुनाति/लुनीते |
| धूञ् कम्पने | धू | धुना | धुनाति/धुनीते |
| ज्या वयोहानौ | ज्या | जिना | जिनाति [सम्प्रसारणी धातुः] |
| री गतिरेषणयोः | री | रिणा | रिणाति |
| ली श्लेषणे | ली | लिना | लिनाति |
| व्ली वरणे | व्ली | व्लिना | व्लिनाति |
| प्ली गतौ | प्ली | प्लिना | प्लिनाति |
| स्तॄञ् आच्छादने | स्तॄ | स्तृणा | स्तृणाति/स्तृणीते |
| कॄञ् हिंसायाम् | कॄ | कृणा | कृणाति/कृणीते |
| वॄञ् वरणे | वॄ | वृणा | वृणाति/वृणीते |
| शॄ हिंसायाम् | शॄ | शृणा | शृणाति |
| पॄ पालनपूरणयोः | पॄ | पृणा | पृणाति |
| वॄ वरणे भरण इत्येके | वॄ | वृणा | वृणाति |
| भॄ भर्त्सने | भॄ | भृणा | भृणाति |
| मॄ हिंसायाम् | मॄ | मृणा | मृणाति |
| दॄ विदारणे | दॄ | दृणा | दृणाति |
| जॄ वयोहानौ | जॄ | जृणा | जृणाति |
| नॄ नये | नॄ | नृणा | नृणाति |
| कॄ हिंसायाम् | कॄ | कृणा | कृणति |
| ॠ गतौ | ॠ | ऋणा | ऋणाति |
| गॄ शब्दे | गॄ | गृणा | गृणाति |

इति प्वादि–अन्तर्गणः समाप्तः

ज्ञा अवबोधने  ज्ञा  जाना  जानाति/जानीते [**ज्ञाजनोर्जा** (७.३.७९) इत्यनेन ज्ञा, जन्–धात्वोः जा–आदेशः शिति परे]

<u>हलन्तधातवः</u> [25 धातवः]

सामान्याः हलन्तधातवः [18 धातवः]

| | | | |
|---|---|---|---|
| खच भूतप्रादुर्भावे | खच् | खच्ञा | खच्ञाति |
| हेठ | हेठ् | हेठना | हेठ्नाति |
| मृड क्षोते | मृड् | मृड्णा | मृड्णाति |
| मृद | मृद् | मृद्ना | मृद्नाति |
| गुध रोषे | गुध् | गुध्ना | गुध्नाति |

| | | | |
|---|---|---|---|
| क्षुभ सञ्चलने | क्षुभ् | क्षुभ्ना | क्षुभ्नाति |
| णभ हिंसायाम् | नभ् | नभ्ना | नभ्नाति |
| तुभ हिंसायाम् | तुभ् | तुभ्ना | तुभ्नाति |
| क्लिशू विबाधने | क्लिश् | क्लिश्ना | क्लिश्नाति |
| अश भोजने | अश् | अश्ना | अश्नाति |
| कुष निष्कर्षे बहिष्करणम् | कुष् | कुष्णा | कुष्णाति |
| इष अभीक्ष्ण्ये पौनः पुन्यम् | इष् | इष्णा | इष्णाति |
| विष विप्रयोगे | विष् | विष्णा | विष्णाति |
| प्रुष | प्रुष् | प्रुष्णा | प्रुष्णाति |
| प्लुष स्नेहन–सेवन्पूरणेषु | प्लुष् | प्लुष्णा | प्लुष्णाति |
| पुष पुष्टौ | पुष् | पुष्णा | पुष्णाति |
| मुष स्तेये | मुष् | मुष्णा | मुष्णाति |
| उध्रस उञ्छे | ध्रस् | ध्रस्ना | ध्रस्नाति |
| | उध्रस् | उध्रस्ना | उध्रस्नाति |

सम्प्रसारणी धातुः

| | | | |
|---|---|---|---|
| ग्रह उपादाने | ग्रह् | गृह्णा | गृह्णाति |

अनिदित्–धातवः [6 धातवः]

| | | | |
|---|---|---|---|
| बन्ध बन्धने | बन्ध् | बध्ना | बध्नाति |
| श्रन्थ विमोचन–प्रतिहर्षयोः | श्रन्थ् | श्रथ्ना | श्रथ्नाति |
| मन्थ विलोडने | मन्थ् | मथ्ना | मथ्नाति |
| श्रन्थ सन्दर्भे | श्रन्थ् | श्रथ्ना | श्रथ्नाति |
| ग्रन्थ सन्दर्भे | ग्रन्थ् | ग्रथ्ना | ग्रथ्नाति |
| कुन्थ संश्लेषणे | कुन्थ् | कुथ्ना | कुथ्नाति |

इति क्र्यादिगणे समग्रं तिङ्–सम्बद्धं सार्वधातुकप्रकरण–चिन्तनं समाप्तम् |

Swarup – July 2013 (Updated November 2015)